श्रीमहालक्ष्मी ज्योतिष परामर्श एवं प्रशिक्षण केन्द्र

## शुक्लयजुर्वेदीय-माध्यन्दिनवाजसनेयिनाम्

# श्रावणीस्नान-विधिः




संकलकौः-
श्रीकृष्ण फुँयालः
चन्द्र प्रकाश आचार्यः

# अथ श्रावणीस्नानम्

## शुक्लयजुर्वेदीय माध्यन्दिनवाजसनेयिनाम् उपाकर्मपद्धतिः।

श्रावणीस्नानमुपाकर्म च कदा भवतीति जिज्ञासायाम्
"श्रावण्यां पौर्णमास्यां श्रवणयुक्तायां श्रवणरहितायां श्रावणस्य शुक्लपञ्चम्यां हस्तयुक्तायामयुक्तायां वा उपाकर्म (अध्यायोपाकर्म) भवति।"
"ओषधीनां प्रादुर्भाव श्रवणेन श्रावण्यां पौर्णमास्यां पञ्चमी हस्तेन वा इति वचनात्।"
**– पारस्करगृह्यसूत्रम्**

## अथ प्रयोगः-

ॐ श्रीपरमात्मने नमः

श्रावणीस्नाने आवश्यकान्युपकरणानि–
कुशाः, तिलाः, यवाः, मृत्तिका, गोमयम्, भस्म, अपामार्गः, सुमनसः, दूर्वादीनि।
{कुश, जौ, तिल, माटो, गोबर, गौँत, घ्यू, दूध, दहि, भस्म, मह, अपामार्ग, दूर्वा, सुगन्धितद्रव्य, फलफुल। }

तत्र सशिष्यो गुरुर्नद्यादौ तडागे वा गत्वा शुचौ देशे आवश्यकान्युपकरणानि संस्थाप्य हस्तौ पादौ प्रक्षाल्य बद्धशिखी यज्ञोपवीत्याचम्य प्रवाहाभिमुखः प्राङ्मुखो वा विधिं कुर्यात्।

तत्र तावत् सशुद्धः सङ्गृहीतसामग्रीकः कर्ता यथासम्भवं समुचितं जलाशयमुपपद्येत।
तत्र च कृताञ्जलिः प्रवाहाभिमुखः—

**ॐतीर्थवर्य! दयासिन्धो!त्वामहं शरणंगतः।**
**सर्वस्माद्वृजिनाद्विष्वक् परिपाहि नमोऽस्तुते॥**
**त्वमेको जगतां पापपुञ्जविध्वंसने पटुः।**
**समुत्तारय पापेभ्यस्त्वयाद्य शरणागतम्॥**

इति पठेत्। अथ तीर्थजलेनात्मानं प्रोक्षमाणः।

**ॐ पुनन्तुमा देवजनाः पुनन्तु मनसाधियः। पुनन्तु विश्वाभूतानि जातवेदः पुनिहि मा॥**

इति पठेत्। अथ तीर्थमृत्स्नामादाय।

**ॐअश्वक्रान्ते रथक्रान्ते विष्णुक्रान्ते वसुन्धरे। उद्धृताऽसिवराहेण कृष्णेन शतबाहुना॥**

**मृत्तिकेह्मपूताऽसि कश्यपेनाभिवन्दिता। मृत्तिके हर मे पापं यन्मया दुष्कृतं कृतम्।**

इति मन्त्रणाभिमन्र्त्य ललाटे मृदा तिलकं विधाय हस्तौ पादौ च प्रलिप्य

जलमञ्जलिना पञ्चवारं बहिर्निक्षिप्य स्नात्वा पञ्चगव्यार्थे पात्रे गोमूत्रं निक्षिपन्॥

**ॐ तत्सवितुर्वरेण्यम्भर्गो देवस्य धीमहि। धियो यो नः प्रचोदयात्॥**

इति पठेत्। ततस्तस्मिन्नेव पात्रे गोमयं निक्षिपन्।

**ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम्। ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम्॥**

इति पठेत्। ततस्तस्मिन्नेव क्षीरं निक्षिपन्।

**ॐ आप्यायस्वसमेतु ते विश्वः सोम वृष्णयम्। भवावाजस्य सङ्गथे॥**

इति पठेत्। ततस्तस्मिन्नेव दधिं निक्षिपन्।

**ॐ दधिक्राव्णोअकारिषञ्जिष्णोरश्वस्यवाजिनः। सुरभिनोमुखाकरत्प्रण आयू ँषि तारिषत्॥**

इति पठेत्। ततस्तस्मिन्नेवाज्यं निक्षिपन्।

**ॐ तेजोसि शुक्रमस्यमृतमसिधामनामासि। प्रियं देवानामनाधृष्टं देवयजनमसि॥**

इति पठेत्। ततस्तानि मेलयन्।

**ॐ देवस्यत्वा सवितुः प्रसवेश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम्॥**

इति पठेत्। तदनन्तरमञ्जलौ किञ्चिद्किञ्चिद्गृहीत्वा॥

**ॐ यन्ममास्थिगतं पापं देहे तिष्ठति यश्च मे। प्राशनात्पञ्चगव्यस्य दहत्यग्निरिवेन्धनम्॥**

इति पठित्वा त्रिवारं पिबेत्। ततः हस्तौ प्रक्षाल्य स्थले जले च तिष्ठन् सपवित्रौ मुक्ताङ्गुष्ठकनिष्ठस्य

करस्याङ्गुष्ठमूले जलं निधाय आचामेत्।

ॐ केशवाय नमः स्वाहा , ॐ नारायणाय नमः स्वाहा , ॐ माधवाय नमः स्वाहा , ॐ हृषीकेशाय नमः इत्यनेन हस्तौप्रक्षाल्य ॥ ४ ॥

इति पठंस्त्रिवारमाचम्यांमुष्ठमूलेन मुखं हि स्पृष्ट्वा तर्जनीमध्यमानामिकाभिर्मुखम्, अंगुष्ठतर्जनीभ्यां नासे, अनामिकागुष्ठाभ्यां चक्षुषीकर्णौ च अंगुष्ठकनिष्ठिकाभ्यां नाभिम्, पाणितलेन हृदयम् संकुचिताग्रेण करेण स्कन्धौ शिरश्च स्पृशेत्। ततः कुशत्रयमादाय तेनानीताभिरद्भिरात्मानं प्रोक्षमाणः ।

**ॐ अपवित्रः पवित्रो वा सर्वावस्थाङ्गतोऽपि वा। यःस्मरेत्पुण्डरीकाक्षं स वाह्याभ्यन्तरः शुचिः ॥ ५ ॥**

इति. त्रिवारं पठेत्। ततः प्राणांस्त्रिंराचम्य दक्षिणहस्तस्यानामिकायां कुशद्वयात्मकं वामहस्तस्यानामिकायां कुशत्रयात्मकं पवित्रं धार्यमाणः ।

**ॐ पवित्रेस्त्थो व्वैष्णव्यौ सवितुर्व्वः प्रसवऽउत्पुनाम्यच्छिद्रेणपवित्रेणसूर्यस्यरश्मिभिः। तस्य ते पवित्रपते पवित्रपूतस्य यत्कामः पुनेतच्छकेयम् ॥ ६ ॥**

इति पठित्वा हस्ते पुष्पाणि गृहीत्वा। प्रार्थयेत्

**ॐ श्रीमन्महागणाधिपतये नमः। ॐ श्रीगुरुभ्यो नमः।**
**ॐ श्रीसरस्वत्यै नमः। ॐ वेदाय नमः।**
**ॐ वेदपुरुषाय नमः। ॐ कुलदेवताभ्यो नमः।**
**ॐ स्थानदेवताभ्यो नमः। ॐ ग्रामदेवताभ्यो नमः।**
**ॐ सर्वेभ्योदेवेभ्यो नमः। ॐसर्वेभ्यो ब्राह्मणेभ्यो नमो नमः।**

**अविघ्नमस्तु।**

**ॐ सुमुखश्चैक दन्तश्च कपिलो गजकर्णकः। लम्बोदरश्च विकटो विघ्ननाशो विनायकः ॥**
**धूम्र केतुर्गणाध्यक्षो भालचन्द्रो गजाननः। द्वादशैतानि नामानि यः पठेच्छृणुयादपि ॥**

**विद्यारम्भे विवाहे च प्रवेशे निर्गमे तथा। संग्रामे संकटे चैत्र, विघ्नस्तस्य न जायते॥**
**शुक्लांबर धरं देवं शशिवर्णं चतुर्भुजम्। प्रसन्नवदनं ध्यायेत् सर्व विघ्नोपशांतये॥**
**अभीप्सितार्थसिद्धयर्थं पूजितो यः सुरासुरैः। सर्वविघ्नहरस्तस्मै गणाधिपतये नमः॥**
**सर्वमंगलमांगल्ये शिवे सर्वार्थसाधिके। शरण्ये त्र्यम्बके गौरि नारायणि नमोस्तु ते॥**
**वक्रतुण्ड महाकाय सूर्यकोटिसमप्रभ। अविघ्नं कुरु मे देव सर्वकार्येषु सर्वदा।**
**वागीशाद्याः सुमनसः सर्वार्थानामुपक्रमे। यन्नत्त्वाकृतकृत्याः स्युस्तं नमामि गजाननम्॥**
**गणनाथं नमस्कृत्य नमस्कृत्य पितामहम्। विष्णु रुद्रं श्रियं देवीं वन्दे भक्त्या रस्वतीम्॥**
**स्थानं क्षेत्रं नमस्कृत्य दिननाथं निशाकरम्। धरणीगर्भसंभूतं शशिपुत्रं वृहस्पतिम्॥**
**दैत्याचार्य नमस्कृत्य सूर्यपुत्रं शनैश्चरम्। राहु केतु नमस्कृत्य यज्ञारम्भे विशेषतः॥**
**शक्रादिदेवताः सर्वा ऋषींश्चैव तपोधनाम्। गर्गमुनिं नमस्कृत्य नारदं पर्वतं तथा॥**
**वसिष्ठं मुनिशार्दूलं विश्वामित्रं च गोभिलम्। अगस्त्यं च पुलस्त्यं च दक्षं मित्रं पराशरम्॥**
**भरद्वाजं च माण्डव्यं याज्ञवल्क्यं च गालवम्। अन्ये विप्रास्तपोयुक्ताः वेदशास्त्र विचक्षणाः।**
**तान्सर्वान् प्रणिपत्याहं शुभकर्म समारभे।**
**लाभस्तेषां जयस्तेषां कृतस्तेषां पराजयः।येषामिन्दीवर श्यामो हृदयस्थो जनार्दनः॥**
**अग्रतः श्रीनृसिंहश्च पृष्ठतो देवकीसुतः। रक्षतां पार्श्वयोर्देवी भ्रातरौ रामलक्ष्मणौ॥**

संकल्पार्थं द्रव्यजलं चादाय।

**सङ्कल्पः–**

स्वस्तिश्रीमुकुन्दसच्चिदानन्दस्य ब्रह्मणोऽनिर्वाच्यमायाशक्तिविजृम्भताविद्यायोगात् कालकर्म स्वभावाविर्भूतमहत्तत्त्वोदिताहङ्कारोद्भूतवियदादिपञ्चमहाभूतेन्द्रियदेवता निर्मितेऽण्डकटाहे चतुर्दशलोकात्मके, लीलया तन्मध्यवर्तिनो भगवतः श्रीनारायणस्य नाभिकमलोद्भुतसकललोकपितामहस्य ब्रह्मणः सृष्टिकर्वतस्तदुद्धरणाय

प्रजापतिप्रार्थितस्य समस्तजगदुत्पत्तिस्थितिलयकारणस्य जगद्रक्षाशिक्षाविचक्षणस्य प्रणतपारिजातस्य अच्युतानन्त-वीर्यस्य श्रीमद्भगवतो महापुरुषस्य, अचिन्त्यापरिमितशक्त्याध्येमाणस्य महाजलौघमध्ये परिभ्रममाणानाम् अनेककोटिब्रह्माण्डानाम् एकतमेऽव्यक्तमहदहङ्कारपृथिव्यप्तेजोवाय्वाकाशाद्यावरणैरावृते, अस्मिन् महति ब्रह्माण्डखण्डे आधारशक्तिश्रीमदादिवाराहदंष्ट्राग्रविराजिते महापद्म-शङ्खाद्यष्टमहानागैयर्ध्रियमाणे, सुप्रतिकाष्टदिग्गज प्रतिष्ठितानाम्, कूर्मानन्तवासुकी-तक्षक-कुलिक-कर्कोटक-पद्म- ऐरावत-पुण्डरीक-वामन-कुमुदाञ्जन-पुष्पदन्त सार्वभौम- अतल-वितल-सुतल-तलातल रसातल महातल-पाताललोकानाम् उपरिभागे भूर्लोक-भुवर्लोक-स्वर्लोक-महर्लोक-जनलोक-तपोलोक-सत्यलोकाख्यसप्तलोकानाम् अधोभागे, चक्रवाल-शैल-महावलयनागमध्यवर्तिनो महाकालमहाफणिराजशेषस्य सहस्रफणानां मणिमण्डलमण्डिते दिग्दन्तिशुण्डोत्तम्भिते, अमरावती-अशोकवती-भोगवती-सिद्धवती-गान्धर्ववती-काञ्च्यवत्यलकावती- यशोवतीति पुण्यपुरीप्रतिष्ठिते इन्द्राग्नियम-निर्ऋति-वरुण-वायु-कुबेरेशानाष्टदिक्पालप्रतिष्ठिते वरध्रुवाधरसोमपाप्रभञ्जनानलप्रत्यूषप्रभाख्याष्टवसुभिर्विराजिते हरत्र्यम्बकरुद्र-मृगव्याधापराजित-कपालीभैरव- शम्भुकपर्दि-वृषाकपिवटुरूपाख्यैकादशरुद्रैः संशोभिते रुद्रोपेन्द्र-सवितृधातृ-त्वष्ट्र्यमेन्द्रेशान-भगमित्र-पूषाख्यद्वादशादित्यप्रकाशिते यमनियमासन-प्राणायामप्रत्याहार-धारणाध्यान-समाध्यष्टाङ्गनिरतवसिष्ठ-बालखिल्य-विश्वामित्र-दक्षकात्त्यायन-कौण्डिण्यगौतमाङ्गिरस-पाराशर्य-व्यासवाल्मीकिशुकशौनक- भरद्वाज-सनकसनन्द-सनातन-सनत्कुमार-नारदादिमुख्यमुनिभिः पवित्रिते, लोकालोकाचलबलयिते लवणेक्षुरस-सुरासर्पि-दधिक्षीरोदकयुक्त-सप्तार्णवपरिवृते, जम्बूप्लक्ष-शाल्मलि-कुशक्रौञ्च-शाकपुष्कराख्य-सप्तद्वीपयुते, इन्द्रकांस्य-ताम्रगभस्ति-नाग-सौम्य गन्धर्व-चारण-भारतेति नवखण्डमण्डिते, सुपर्णगिरि-कर्णिकोपेत-महासरोरुहाकार-पञ्चाशत्कोटियोजनविस्तीर्णे भूमण्डले, अयोध्या-मथुरा-माया-काशी-काञ्च्यवन्तिका- द्वारावतीति सप्तपुरीप्रतिष्ठिते, महामुक्तिप्रदस्थले शालग्रामशम्भलनन्दिग्रामेति ग्रामत्रयविराजिते, चम्पकारण्य-वदरिकारण्य-दण्डकारण्य-धर्मारण्य-पद्मारण्य-गुह्यारण्य-जम्बूकारण्य-विन्ध्यारण्य द्राक्षारण्य-नहुषारण्य-काम्यकारण्य-द्वैतारण्य-नैमिषारण्यादीनां मध्ये, सुमेरु-

निषधकूट–शुभ्रकूट–श्रीकूट–हेमकूट–रजतकूट–चित्रकूट–त्रिकूट–किष्किन्ध–श्वेताद्रिकूट हिमविन्ध्याचलानां हरिवर्ष–किम्पुरुषवर्षयोश्च दक्षिणे, नवसहस्रयोजनविस्तीर्णे, भरतखण्डे, मलयाचल–सह्याचल–विन्ध्याचलानामुत्तरेण स्वर्णप्रस्थ–चण्डप्रस्थ सूक्तिक आवन्तक–रमणक– महारमणक–पाञ्चजन्य–सिंहल–लङ्काशोकवत्यलकावती–सिद्धवती–गान्धर्ववत्यादि–पुण्यपुरीविराजिते नवखण्डोपद्वीपमण्डिते दक्षिणावस्थित–रेणुकाद्वय–शूकर–काशी–काञ्ची–कालिका लवटेश्वर–कालञ्जर– महाकालेति नवोषरयुते द्वादशज्योतिर्लिङ्ग–गङ्गा (भागीरथी) गोदावरी (गौतमी)–क्षिप्रा–यमुना–सरस्वती–नर्मदा–तापी–पयोष्णी–चन्द्रभागा कावेरी–मन्दाकिनी–प्रवरा–कृष्णा–वेण्या–भीमरथी–तुङ्गभद्रा–मलापहा–कृतमाला–ताम्रपर्णी–विशालाक्षी–वञ्जुला चर्मण्वती–वेत्रवती–भोगवती–विशोका–कौशिकी–गण्डकी–वाशिष्ठी–प्रमदा–विश्वामित्री–फल्गुनी–चित्रकाश्यपी–सरयू–सर्वपापहारिणी–करतोया–प्रणीता–वज्रा–वक्रगामिनी–सुवर्णरेखा–शोणा–भवनाशिनी–शीघ्रगा–कुशावर्त्तिनी–ब्रह्मानन्दा–महीतनयेत्यादिभिः अनेकपुण्यनदीभिर्विलसिते, ब्रह्मपुत्रसिन्धुनदादिपरमपवित्रजलविराजिते, हिमवन्मेरु–गोवर्धन–क्रौञ्च चित्रकूट हेमकूट–महेन्द्र–मलय–सत्येन्द्रकील–पारियात्राद्यनेकैः पर्वतैः समन्विते मतङ्ग–माल्य–किष्किन्ध ऋष्यश्रृङ्गेति महानगसमन्विते अङ्गवङ्गकलिङ्ग–काश्मीरकाम्बोज–सौवीर–सौराष्ट्र महाराष्ट्र मगध नेपाल–केरल–चोल–पाञ्चाल–गौड– मालव–मलय–सिंहल द्रविड–कर्नाटक–ललाट करहाट–वरहाट–पाण्डथ–निषध–मागध आन्ध–दशार्णव– भोज–कुरु–गान्धार–विदर्भ–विदेह बाल्हीक बर्बर–कैकेय–कोसल–विराट–शूरसेन–कोङ्कण–कैकट–मत्स्य– मद्र–पारसिक–खर्जर–यवन–म्लेच्छ–जालन्धरेति सिद्धवत्यन्यदेशविशेष–भाषाभूमिपाल–विभूषिते, इलावृत–कुरुभद्राश्व–केतुमाल–किम्पुरुष–रमणक–हिरण्मयादि नववर्षाणां मध्ये भारतवर्षे, भरतखण्डे, वकुल–चम्पक– पाटलाब्ज–पुन्नाग–जाति–करवीर–रसाल–कल्हार–केतक्यादिनानाविध–कुसुमस्तवकविराजिते, कोकन्त– हिरण्यशृङ्ग–कुब्जार्बुद–मणिकर्णी–वटशालाग्राम–शूकर–मथुरा–गया–निष्क्रमण–लोहार्गल पोतस्वामि–प्रभास– बदरीति चतुर्दशगुह्यविलसिते जम्बूद्वीपे कुरुक्षेत्रादिसमभूमध्यरेखायाः पश्चिमदिग्भागे कुलमेरोर्दक्षिण–दिग्भागे विन्ध्याचलादुत्तरभागे श्रीशैलस्य वायव्यकोणे कृष्णावेण्ययोर्मध्यदेशे मत्स्य–कूर्म–वराह–नृसिंह– वामन–परशुराम–राम–कृष्ण–बुद्ध–कल्कीति दशावताराणां मध्ये बौद्धावतारे गङ्गादिसरिद्भिः पाविते, एवं

नवसहस्रयोजनविस्तीर्णभारतवर्षे, निखिलजनपावन–परमभागवतोत्तम–शौनकादिनिवासिते, नैमिषारण्ये ,आर्यावर्तान्तर्गते ब्रह्मावर्तैकदेशे सूर्यान्वयभूभृत्प्रतिष्ठिते श्रीमन्नारायण–नाभिकमलोद्भूत–सकलजगत्स्रष्टुः परार्द्धद्वयजीविनो ब्रह्मणो द्वितीयपरार्धे एकपञ्चाशत्तमे वर्षे प्रथमे मासे प्रथमे पक्षे प्रथमे दिवसे अह्नो द्वितीये यामे तृतीये मुहूर्त्ते रथन्तरादि–द्वात्रिंशत्कल्पानां मध्ये अष्टमे श्वेतवाराहकल्पे स्वायम्भुवादि–मन्वन्तराणां मध्ये सप्तमे वैवस्वतमन्वन्तरे कृतत्रेताद्वापरकलिसंज्ञकानां चतुर्युगानां मध्ये वर्त्तमाने अष्टाविंशतितमे कलियुगे तस्य प्रथमचरणे श्रीमन्नृपविक्रमार्कात् शालिवाहनाद्वा यथासंख्यागमेन चान्द्र–सावन–सौरनक्षत्रादि–प्रकारेणागतानां प्रभवादि षष्टिसंवत्सराणां मध्ये...... नाम्नि सम्वत्सरे उत्तरगोलावलम्बिनि श्रीमार्तण्डमण्डले ...... ॠतौ मासे पक्षे तिथौ वासरे नक्षत्रे योगे करणे राशिस्थिते चन्द्रमसि ....... राशिस्थिते सवितरि राशिस्थिते देवगुरौ शेषेषु ग्रहेषु यथास्थानस्थितेषु सत्सु एवं ग्रहगणविशेषेण विशिष्टायां शुभपुण्यतिथौ, अद्य... गोत्रस्य... प्रवरस्य शुक्लयजुर्वेदमाध्यन्दिनीय–वाजसनेयशाखाध्यायिनः ........ शर्मणः सभार्यस्य सपरिवारस्य कुम्टुम्बसहितस्य मम, इह जन्मनि जमान्तरे वा बाल्य–यौवन–वार्धक्यावस्थासु वाक्पाणि पादपायूपस्थ घ्राणरसना–चक्षुःस्पर्शन–श्रोत्रमनोभिश्चरित–ज्ञाताज्ञात कामाकाम– महापातकोपपातकादि–सञ्चितानां पापानां ब्रह्महनन–सुरापान–सुवर्णस्तेय–गुरुतल्पगमन–तत्संसर्गरूपाणां पातकानां बुद्धिपूर्वकाणां मनोवाक्कायकृतानां बहुकालाभ्यस्तानाम् उपपातकानां च स्पृष्टास्पृष्ट–सङ्करीकरण–मलिनीकरण–अपात्रीकरण–जातिभ्रंशकरणा–विहिताकरण–कर्मलोपजनितानां रसविक्रय–कन्याविक्रय–हयविक्रय–गोविक्रय–खरोष्ट्रविक्रय–दासीविक्रय–अजादिपशुविक्रय–स्वगृहविक्रय–नीलीविक्रय – स्वगृहविक्रय–नीलीविक्रयाक्रय–विक्रयपण्यविक्रय– जलचरादि–जन्तुविक्रय–स्थलचरादिविक्रय–खेचरादिविक्रय–सम्भूतानां निरर्थकवृक्षच्छेदन–ॠणानपाकरण– ब्रह्मस्वापहरण–देवस्वापहरण–राजस्वापहरण–परद्रव्यापहरण–तैलादिद्रव्यापहरण–फलादिहरण–लोहादिहरण–नानावस्तुहरणरूपाणां ब्राह्मणनिन्दा–गुरुनिन्दा–वेदनिन्दा–शास्त्रनिन्दा परनिन्दा–अभक्ष्याभक्षण–अभोज्यभोजन– अचोष्यचोषण–अलेह्यलेहन अपेयपान अस्पृश्यस्पर्शन–अश्राव्यश्रवण–अहिंस्यहिंसन अवन्धवन्दन– अचिन्त्यचिन्तन–अयाज्ययजन–अपूज्यपूजनरूपाणां मातृपितृतत्समत्तिरस्कार–स्त्रीपुरुषप्रीतिभेदन–परस्त्रीगमन– विधवागमन–वेश्यागमन–दासीगमन–चाण्डालादिहीनजातिगमन–

गुदागमन–रजस्वलागमन–पश्वादिगमनरूपाणां कूटसाक्षित्ववाद–मिथ्यापवाद–म्लेच्छसम्भाषण–ब्रह्मद्वेषकरण– ब्रह्मवृत्तिच्छेदन–परवृत्तिहरणरूपाणां मित्रवञ्चन–गुरुवञ्चन–स्वामीवञ्चन–असत्यभाषण–गर्भपातन–पथिताम्बूलचर्वण–हीनजातिसेवन– परान्नभोजन–गणान्नभोजन–लशुनपलाण्डुगृञ्जनभक्षण–तालवृक्षफलभक्षण–उच्छिष्टभक्षण–मार्जारोच्छिष्टभक्षण– पर्युषितान्नभक्षणरूपाणां पङ्क्तिभेदकरण–भ्रूणहिंसा–बालहिंसाद्यनेक हिंसोद्भूतानां शौचत्याग–स्नानत्याग–सन्ध्यात्यागौपासनाग्नित्याग–वैश्वदेवत्यागरूपाणां निषिद्धाचरण–कुग्रामवास–ब्रह्मद्रोह–पितृमातृद्रोह–परद्रोह– परनिन्दात्मस्तुति–दुष्टप्रतिग्रह–दुर्जनसंसर्गरूपाणां गोयान–वृषभयान–महिषीयान–गर्दभयान–ऊष्ट्रयान– अजयान–भृत्याभरण–स्वग्रामत्याग–गोत्रत्याग–कुलत्याग–दूरस्थमन्त्रण–विप्राशाभेदनावन्दिताशीर्वादग्रहण–पतितसम्भाषणरूपाणां पतितजनपङ्क्तिभोजन–अहःसङ्गम–व्यामनोरथादिपापानां तथा च महापापोपपापाभ्यां नानायोनिषु अद्यावधि कृतानां परभयोत्पादनादि–प्रकीर्णपातकानामेतत्कालपर्यन्तं सञ्चितानां लघूनां स्थूलानां सूक्ष्मांणां च पापानां परिहारार्थतथाधीतानामध्यापितानां चाध्यायानां स्थापनविच्छेदक्रोषणदन्तविवृतदुर्वृत–द्रुतवोंच्चारितवर्णानां पूर्वसवर्णानां गलोपलम्बितवृथोच्चारित– वर्णानां श्लिष्टवर्ण नाविघट्टनादिभिः पठितानां पाठिनानां श्रुतीनां यद्यातयामत्वं तत्परिहारार्थमष्टत्रिंशदनध्यायाध्ययनरथ्यासंचरतः शूद्रस्य म्लेच्छान्त्यजादेर्वा शृण्वतोध्ययने अशुचिदेशध्ययने आत्मनोशुचित्वेध्ययनेचरस्वरानुस्वारपदच्छेदकण्डिकाव्यञ्जनह्रस्वदीर्घ–प्लुतकण्ठतालु मूर्द्धन्योष्टदन्त्य नासिकानुनासिकरेफजिह्वामूलीयोपध्मानी–योदाचानुदाचस्वरितादीनां व्यत्ययेनोच्चारणे माधुर्याक्षरव्यक्ति हीनत्वाद्यनेकप्रत्यवायपरिहारपूर्णकं सर्वस्य वेदस्य सवीर्यस्य सम्पादनद्वारायथावत्फलप्राप्त्यर्थं श्रीपरमेश्वर प्रीत्यर्थं सशिष्यः सयजमानो देवब्राह्मणसवितृ सूर्यना– रायणसन्निधौ (यनुनायां) गंगाभागीरथ्याममुकतीर्थे वा प्रवाहाभिमुखं शुक्रयजुर्वेददोंत्सगोपाकरणमहं करिष्ये।

## (ख) तीर्थप्रार्थना

**ॐ नमामि गङ्गेतव पादपङ्कजं सुरासुरैर्वन्दितदिव्यरूपम्।**
**भुक्तिं च मुक्तिं च ददासि नित्यं भावानुसारेण सदा नराणाम्॥**

**पापिनामुद्धतिकृते समुद्भूतासि भूतले दह मे सर्वपापानि मां पुनीहि सुरेश्वरि ॥**
**त्वमेव गतिरस्माकं पततां नरकार्णवे। समुद्धर महादेव जटाजूटनिवासिनि ॥**
**या गतिर्योगयुक्तानां मुनीनामूर्ध्वरेतसाम्। सा गतिः सर्वजन्तूनां गौतमीतीरवासिनाम्॥**
**पुष्करादीनि तीर्थानि गङ्गाद्याः सरितस्तथा आगच्छन्तु पवित्राणि स्नानकाले सदा मम ॥**
**त्वं राजा सर्वतीर्थानां त्वमेव जगतः पिता। याचितं देहि तीर्थं मे तीर्थराज नमोऽस्तु ते ॥**
**अपामधिपतिस्त्वं च तीर्थेषु वसतिस्तव। वरुणाय नमस्तुभ्यं स्नानानुज्ञां प्रयच्छ मे ॥**
**अधिष्ठातर्यश्च तीर्थानां तीर्थेषु विचरन्ति याः। देवतास्ताः प्रयच्छन्तु स्नानाज्ञां मम सर्वदा ॥**
**गङ्गे च यमुने चैव गोदावरि सरस्वति। नर्मदे सिन्धु कावेरि जलेऽस्मिन् सन्निधिं कुरु ॥**
**चन्द्रभागे महाभागे शरणागतवत्सले। गण्डकी सरयूयुक्ता समासाद्य पुनीहि माम्॥**
**सर्वाणि यानि तीर्थानि पापमोचनहेतवः । आयान्तु स्नानकालेऽस्मिन् क्षणं कुर्वन्तु सन्निधिम्॥**

इति संप्रार्थ्य तत उरुꣳहीति न्युब्जाञ्जलिहस्तेन तोयमभिमन्त्रयेत्।

(उपर्युक्त मन्त्रद्वारा प्रार्थना गरेर जलमा हात घोप्टो बनाएर उरु ꣳ हि यो मन्त्रले जलको अभिमन्त्रण गर्ने)

## (ग) जलाभिमन्त्रणम्

ॐ उरुꣳहीत्यस्य शुनश्शेषऋषिर्वरुणोदेवता त्रिष्टुप् छन्दो जलाभिमन्त्रणे विनियोगः।

**ॐ उरुꣳहि राजा वरुणश्चकार सूर्याय पन्थामन्वेतवाऽउ अपदे पादाप्रतिधातवेकरुतापवक्ता हृदयाविधश्चित्। नमो वरुणायाभिष्ठितो वरुणस्य पाशः ॥**

ततो ये ते शतमिति जलमावर्तयेत्।

## (घ) जलावर्तनम् (जललाई हातले दाँयाबाट घुमाइराख्ने)

ॐ येते शतमित्यस्य वामदेवऋषिर्वरुणसवितृविष्णुविश्वमरुत्स्वर्कादेवतास्त्रिष्टुप्छन्दस्तोयावर्त्तने विनियोगः।

**ॐ ये ते शतं वरुणं ये सहस्रं यज्ञियाः पाशा वितता महान्तः।**
**तेभिर्नोऽअद्य सवितोत विष्णुर्विश्वे मुञ्चन्तु मरुतः स्वर्काः।**

ततः सुमित्रिया न इत्यपोऽञ्जलिनाऽऽदाय–

(ङ) **जलमादानं निषिञ्चनञ्च** **(जललाई हातमा लिने)**

ॐ सुमित्रियान इति मन्त्रस्य प्रजापति ऋषिः आपो देवता यजुर्मार्जने विनियोगः।

**ॐ सुमित्रिया नऽआपऽओषधयः सन्तु। इति।**

**(काम क्रोध आदि शत्रुलाई उद्देश्य गरेर तीर्थतटमा, आफ्नो वायाँ भागमा जल छोडिदिने)**

"दुर्मित्रिया इति द्वेष्यं प्रति निषिञ्चेत्" (कामादीन् शत्रूनुद्दिश्य तीर्थतटे स्ववामभागे निषिञ्चेत्) ।

ॐ दुर्म्मित्रियेत्यस्य प्रजापति ऋषिरापोदेवता द्वेष्यनाशार्थं जलक्षेपणे विनियोगः।

**ॐ दुर्म्मित्रियास्तस्मै सन्तु योस्मान्द्वेष्टि यञ्च वयं द्विष्मः** । इति।

कटिं वस्त्यूरु जङ्घे चरणौ करौ मृदा त्रिस्त्रिः प्रक्षाल्याचम्य **नमस्योदकमालभेदङ्गानि** मृदेदं विष्णुरिति।

(च) मृत्तिकालेपनम्

ॐ इदं विष्णुरित्यस्य मेघतिथि ऋषिर्विष्णुर्देवता गायत्रीछन्दो मृदनुलेपने विनियोगः।

मुल्लेपनप्रकारो यथा

मृत्स्नामादाय तस्या भागत्रयं कृत्वा प्रथमभागं वामहस्तेनादाय नाभेरधः कटिप्रदेशमनुलिप्य हस्तं प्रक्षाल्य द्वितीयभागमादाय वामहस्तेन प्राग्वस्तिमूरुः जङ्घे चरणौ करौ च त्रिस्त्रिरनुलिप्य हस्तं प्रक्षाल्याचम्य तीर्थोदकं साञ्जलिः शिरसा प्रणमेत् । पुनस्तथैव तृतीयभागं वामहस्ते निधाय दक्षिणहस्तेन नाभेरुपरि ललाटमारभ्य नाभिपर्यन्तं लेपयेत्। सर्वत्र लेपने **'इदं विष्णुरिति'** मन्त्रावृत्तिः।

(माटो दाँया हातमा राखेर वाँया हातले तीन भाग लगाउने। प्रथम भागलाई वाँया हातले लिएर नाभि भन्दा तल कम्मर सम्म लेपन गर्ने र वाँया हात पखाल्ने र पुनः दोस्रो भागलाई वाँया हातले लिने र घुँडा, जङ्घा, खुट्टा तथा हातमा तीन तीन पटक लेपन गरेर पुनः वाँया हात पखाल्ने, दाँया हातको माटोलाई वाँया हातमा राखेर दाँया हातले आचमन गर्ने, तीर्थको जललाई नमस्कार गरेर शिरले ढोग गर्ने । वाँया हातमा भएको तेस्रो

भागलाई निधार देखि लिएर नाभि सम्म लगाउने। प्रत्येक पटक माटोले लेपन गर्दा इदं विष्णुर्विचक्रमे आदि मन्त्र भन्ने)

**ॐ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम्। समूढमस्यपाँसुरे स्वाहा॥**

**ॐ अश्वक्रान्ते रथक्रान्ते विष्णुक्रान्ते वसुन्धरे। मृत्तिके हर मे पापं यन्मया दुष्कृतं कृतम्॥**

**उद्धृतासि वराहेण कृष्णेन शतबाहुना। नमस्ते सर्वभूतानां प्रभवारणि सुव्रते॥**

**मृत्तिके ब्रह्मभूतासि कश्यपेनाभिवन्दिता। त्वया हतेषु पापेषु गच्छेयं परमां गतिम्॥**

ततः नाभिपरिमाणं तीर्थजलान्तः प्रविश्य सूर्याभिमुखो निमज्जेदापोऽअस्मानिति।

## (छ) स्नानम् (तीर्थजलमा नाभि सम्मको भाग डुबाएर पूर्व मुख गरेर जलमा ६ पटक डुप्की लगाउने)

ॐ आपो अस्मानित्यस्य प्रजापति ऋषिरापो देवता अत्यष्टिश्छन्दो मज्जनोन्मज्जने विनियोगः।

**ॐ आपोऽअस्मान्मातरः शुन्धयन्तु घृतेन नो घृतप्वः पुनन्तु। विश्वँहि रिप्रम्प्रवहन्ति देवीः॥**

स्नात्वोदिदाभ्य इत्युन्मज्जेत्।

**ॐ उदिदाभ्यः शुचिरापूतऽएमि**॥ इत्युन्मज्ज्य पुनस्तूष्णीं त्रिवारं निमज्ज्योन्मज्ज्याचम्य गोमयेन विलिम्पेन्मानस्तोक इति।

## (ज) गोमयलेपनम् (आचमन गरेर गोबरले स्नान)

ॐ मानस्तोक इत्यस्य कुत्सऋषिरुद्रोदेवता जगती छन्दो गोमयानुलेपने विनियोगः।

तत्प्रकारो यथा–

पाणिभ्यां गोमयमादाय सूर्यं दर्शयित्वा भागत्रयं कृत्वा प्रथमभागं वामहस्तेनादाय नाभेरधस्ताल्लेपयेत्। पुनर्हस्तौ प्रक्षाल्य द्वितीयभागं पूर्ववद्वामहस्तेन ऊरुः वस्ति जङ्घे पादौ करौ च लेपयेत्। पुनर्हस्तौ प्रक्षाल्य दक्षिणेन पाणिना तृतीयं भागमादाय नाभेरूर्ध्वं ललाटमारभ्य नाभिपर्यन्तं लेपयेत्।

(हातमा गोबर लिई सूर्यनारायणलाई देखाएर दाँया हातमा राखेर वाँया हातले तीन भाग लगाउने। प्रथम भागलाई वाँया हातले लिएर नाभि भन्दा तल कम्मर सम्म लेपन गर्ने र वाँया हात पखाल्ने र पुनः दोस्रो भागलाई वाँया हातले लिने र घुँडा, जङ्घा, खुट्टा तथा हातमा तीन तीन पटक लेपन गरेर पुनः वाँया हात पखाल्ने, दाँया हातमा भएको तेस्रो भागलाई दाँया हातले नै निधार देखि नाभि सम्म लगाउने। प्रत्येक पटक गोबर लेपन गर्दा मानस्तोके तनये आदि मन्त्र भन्ने)

**ॐ मा नस्तोके तनये मा नऽआयुषि मा नो गोषु मा नोऽअश्वेषु रीरिषः।**
**मा नो वीरान्नुद्रभामिनो वधीर्हविष्मन्तः सदमित्त्वा हवामहे।**

**ॐ अग्रमग्रं चरन्तीनामोषधीनां वने वने।**
**तासामृषभपत्नीनां पवित्रं कायशोधनम्॥**
**यन्मे रोगं च शोकं च तन्मे दहतु गोमयम्॥** इति॥

## (फ) पुनः स्नानम्–

पुनः पूर्ववदापोऽअस्मानिति प्रागुक्तौ मन्त्री पठन् त्रिवारं निमज्ज्य स्नायात्। (तीन पटक डुबुल्की लगाउने)

**ॐ आपोऽअस्मान्मातरः शुन्धयन्तु घृतेन नो घृतप्वः पुनन्तु। विश्वᳬहि रिप्रम्प्रवहन्ति देवीः॥**
**ॐ उदिदाभ्यः शुचिरापूतऽएमि.............॥**

ततः सजलं भस्माऽऽदाय दक्षिणेन पाणिना ललाटादिनाभ्यन्तं शरीरं लेपयेत्।

## (ञ) भस्मलेपनम्– (भस्मलेपन– जलले भिजाएर भस्मलाई दाँया हातले लिएर निधार देखि नाभि सम्म लगाउने)

"ॐ अग्निरिति भस्म, ॐ प्रसद्य भस्म" इति द्वौ मन्त्री पठेत्।

**ॐ अग्निरिति भस्म, वायुरिति भस्म, जलमिति भस्म, स्थलमिति भस्म, व्योमेति भस्म। सर्वᳬह**
**वा इदं भस्म। मन एतानि चक्षूषि भस्मानि॥**

**ॐ प्रसद्य भस्मना योनिमपश्च पृथिवीमग्ने। सᳬसृज्य मातृभिष्ट्वज्ज्योतिष्मान्पुनरासदः॥** इति।

“ततोऽभिषिञ्चेदिमं मे वरुणेति चतसृभिः, मापः...., उदुत्तमं...., मुञ्चन्तु...., अववभृथ.....इति अन्ते चैतत्”
यथा कुशोन्नीतेन प्रतिमन्त्रं नाभेरुर्ध्वं दक्षिणपार्श्वमारभ्य शिरो नीत्वा नाभेर्वामपार्श्वान्तं सिञ्चेत्।

**(ट) कुशोदकेन सेचनम् (तल दिइएका प्रत्येक मन्त्र भन्दै, कुशले नाभि देखि शिर सम्म दाँया भागमा सेचन गर्ने र पुनः शिर देखि नाभि सम्म बाँया भागमा सेचन गर्ने)**

मन्त्राश्च– (मन्त्रहरु)

**ॐ इमम्मे वरुण श्रुधी हवमद्या च मृडय। त्वामवस्युराचके॥**

**ॐ तत्त्वा यामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानोहविर्भिः। अहेडमानो वरुणेह बोध्युरुशꣳस मा नऽआयुः प्रमोषीः॥**

**ॐ त्वन्नोऽअग्ने वरुणस्य विद्वान्देवस्य हेडोऽअवयासिसीष्ठाः। यजिष्ठो वह्नितमः शोशुचानो विश्वा द्वेषाꣳसि प्रमुमुग्ध्यस्मत्॥**

**ॐ स त्वन्नोऽअग्नेवमो भवोती नेदिष्ठोऽअस्याऽउषसो व्युष्टौ। अवयक्ष्व नो वरुणꣳरराणो वीहि मृडीकꣳसुहवो नऽएधि॥**

**ॐ मापो मौषधीर्हिꣳसीर्धाम्नो धाम्नो राजंस्ततो वरुण नो मुञ्च। यदाहुरघ्न्याऽइति वरुणेति शपामहे ततो वरुण नो मुञ्च॥**

**ॐ उदुत्तमं वरुणपाशमस्मदवाधमं विमध्यमꣳश्रथाय। अथावयमादित्यव्रते तवानागसोऽअदितये स्याम॥**

**ॐ मुञ्चन्तु मा शपथ्यादथो वरुण्यादुत। अथो यमस्य पड्वीशात्सर्वस्माद्देव किल्विषात्।**

**ॐ अवभृथ निचुम्पुण निचेरुरसि निचुम्पुणः। अव देवैर्देवकृतमेनोयासिषमव मर्त्यैर्मर्त्त्यकृतं पुरुराव्णोदेवरिषस्पाहि॥**

इत्यभिषिच्य “निमज्ज्योन्मज्ज्याचम्य दर्भैः पावयेत्। आपो हिष्ठेति तिसृभिरिदमापो हविष्मतीर्देवीराप इति द्वाभ्यामपो देवा द्रुपदादिव शन्नोदेवीरपाꣳरसमपोदेवीः पुनन्तुमेति नवभिः कुशोन्नीतेन जलेनात्मानमभिषिञ्चेत्”।

त्रिभिर्दर्भैर्दक्षिणकरधृतैः सोदकैर्नाभिमारभ्य प्रदक्षिणं नाभिपर्यन्तं वक्ष्यमाणैः प्रणवादिभिर्गायत्रीपूर्वैरापो हिष्ठेत्यादिभिर्मन्त्रैरात्मानं पावयेत्।

आदौ गायत्र्याभिषिच्य–

(डुबुल्की मारेर, आचमन गर्ने र तीनवटा कुशलाई दाँया हातमा लिएर पहिले गायत्री मन्त्रले अभिषेक गरेर तल दिएका मन्त्रद्वारा अभिषेक गर्ने)

**ॐ आपो हिष्ठा मयो भुवस्तानऽऊर्जे दधातन। महे रणाय चक्षसे॥**

**ॐ योवः शिवतमो रसस्तस्य भाजयते ह नः। उशतीरिव मातरः॥**

**ॐ तस्माऽअरङ्गमामवो यस्य क्षयाय जिन्वथ। आपो जनयथा च नः॥**

**ॐ इदमापः प्रवहतावद्यञ्च मलञ्च यत्। यच्चाभिदुद्रोहानृतंयच्च शेपेऽअभीरुणम्। आपो मा तस्मादेनसः पवमानश्च मुञ्चतु॥**

**ॐ हविष्मतीरिमाऽआपोहविष्माँ २आविवासति। हविष्मान्देवोऽअध्वरो हविष्माँऽअस्तु सूर्यः॥**

**ॐ देवीरापोऽअपान्नपाद्यो वऽऊर्मिर्हविष्यइन्द्रियावान्मदिन्तमः। तन्देवेभ्यो देवत्रा दत्त शुक्रपेभ्यो येषां भागस्थ स्वाहा॥**

**ॐ कार्षिरसि समुद्रस्य त्वा क्षित्त्याऽउन्नयामि। समापोऽअद्भिरग्मत समोषधीभिरोषधीः॥**

**ॐ अपो देवा मधुमतीरगृब्भ्णन्नूर्जस्वती राजस्वश्चितानाः। याभिर्मित्रावरुणावभ्यषिञ्चन्याभिरिन्द्रमनयन्नत्यरातीः॥**

**ॐ द्रुपदादिव मुमुचानः स्विन्नः स्नातो मलादिव। पूतं पवित्रेणे वाज्यमापः शुन्धन्तु मैनसः॥**

**ॐ शन्नो देवीरभिष्टयऽआपो भवन्तु पीतये। शं योरभिस्रवन्तु नः॥**

**ॐ अपाँरसमुद्वयसँसूर्ये सन्तँसमाहितम्। अपाँरसस्य यो रसस्तंव्वो गृह्णाम्युत्तममुपयामगृहीतोसीन्द्राय त्वा जुष्टङ्गृह्णाम्येष ते योनिरिन्द्राय त्वा जुष्टतमम्॥**

**ॐ अपो देवीरुप सृज मधुमतीरयक्ष्माय प्रजाब्भ्यः । तासामास्थानादुज्जिहतामोषधयः सुपिप्पलाः ॥**

**ॐ पुनन्तु मा पितरः सोम्यासः पुनन्तु मा पितामहाः पुनन्तु प्रपितामहाः। पवित्रेण शतायुषा । पुनन्तु मा पितामहाः पुनन्तु प्रपितामहाः। पवित्रेण शतायुषा विश्वमायुर्व्यश्नवै ॥**

**ॐ अग्नऽआयूँषि पवसऽआसुवोर्जमिषञ्च नः। आरे बाधस्व दुच्छुनाम् ॥**

**ॐ पुनन्तु मा देवजनाः पुनन्तु मनसा धियः । पुनन्तु विश्वा भूतानि जातवेदः पुनीहि मा ॥**

**ॐ पवित्रेण पुनीहि मा शुक्रेण देव दीद्यत्। अग्ने क्रत्वा क्रतूँ१॥ रनु ॥**

**ॐ यत्ते पवित्रमर्चिष्यग्ने विततमन्तरा । ब्रह्म तेन पुनातु मा ॥**

**ॐ पवमानः सोऽअद्य नः पवित्रेण विचर्षणिः। यः पोता स पुनातु मा ॥**

**ॐ उभाभ्यां देव सवितः पवित्रेण सवेन च। मां पुनीहि विश्वतः ।**

**ॐ वैश्वदेवी पुनती देव्यागाद्यस्यामिमा बह्व्यस्तन्वो वीतपृष्ठाः ॥**
**तया मदन्तः सधमादेषु वयँस्याम पतयो रयीणाम् ।**

पश्चात्तूष्णीमाचम्य "चित्पतिर्मेत्योङ्कारेण व्याहृतिभिर्गायित्र्या चादावन्ते च । इमम्मे इत्यष्टौ"–

(मौन भएर, आचमन गरेर, तल दिएका मन्त्रद्वारा पुनातु भन्दा सेचन गर्ने)

**ॐ चित्पतिर्मा पुनात्वच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः ।**
**तस्य ते पवित्रपते पवित्रपूतस्य यत्कामः पुने तच्छकेयम् ।**

**ॐ वाक्पतिर्मा पुनात्वच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः ।**
**तस्य ते पवित्रपते पवित्रपूतस्य यत्कामः पुने तच्छकेयम् ॥**

**ॐ देवो मा सविता पुनात्वच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः ।**
**तस्य ते पवित्रपते पवित्रपूतस्य यत्कामः पुने तच्छकेयम् ॥ ॐ पुनातु ।**

**ॐ इमं मे वरुण श्रुधी हवमद्या च मृडय । त्वामवस्युराचके ॥ ॐ भूः पुनातु ।**

**ॐ तत्त्वा यामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्भिः ।**
**अहेडमानो वरुणेह बोध्युरुशँसमा नऽआयुः प्रमोषीः ॥ ॐ भुवः पुनातु ।**

**ॐ त्वन्नोऽअग्ने वरुणस्य विद्वान् देवस्य हेडोऽअवयासिसीष्ठाः।**
**यजिष्ठो वह्नितमः शोशुचानो विश्वा द्वेषाँसि प्रमुमुग्ध्यस्मत्॥** ॐ स्वः पुनातु।

**ॐ सत्वन्नोऽअग्ने वमो भवोती नेदिष्ठोऽअस्याऽउषसो व्युष्टौ।**
**अव यक्ष्वनो वरुणँरराणो वीहि मुडीकँ सुहवो नऽएधि॥** ॐ महः पुनातु।

**ॐ मापो मौषधीर्हिँसीर्धाम्नो धाम्नो राजँस्ततो वरुण नो मुञ्च।**
**यदाहुरघ्न्याऽइति वरुणेति शपामहे ततो वरुण नो मुञ्च॥** ॐ जनः पुनातु।

**ॐ उदुत्तमं वरुण पाशमस्मदवाधमं विमध्यमँश्रथाय।**
**अथावयमादित्य व्रते तवानागसोऽअदितये स्याम॥** ॐ सत्यं पुनातु।

**ॐ अवभृथ निचुम्पुण निचेरुरसि निचुम्पुणः।**
**अवदेवैर्देवकृतमेनोयासिषमव मर्त्यैर्मर्त्यकृतम्पुरुराव्णो देव रिषस्पाहि॥** ॐ ऊर्ध्वं पुनातु।

**ॐ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि। धियो यो नः प्रचोदयात्॥** ॐ सर्वं पुनातु।

## (ठ) अपामार्गेण मार्जनम्–

ॐअपाघमित्यस्य शुनःशेष ऋषिलिङ्गोक्तदेवता अनुष्टुप्छन्दोऽअपामार्गेण मार्जने विनियोगः।

**(कुशलाई जलमा छोडिदिने र स्नान गर्ने। दाँया हातमा अपामार्ग (दतीउन) लिएर नाभि देखि शिर सम्म दाँया भागमा सेचन गर्ने र पुनः शिर देखि नाभि सम्म वाँया भागमा सेचन गर्ने)**

ततः कुशान् जले निक्षिप्य स्नायात्। पुनरपामार्गमादाय दक्षिणपाणिना वक्ष्यमाणमन्त्रं पठन् नाभेरूर्ध्वं नाभेर्दक्षिणपार्श्वमारभ्य शिरसि नीत्वा वामपार्श्वान्तं मार्जयेत्।

**ॐ अपाघमप किल्बिषमप कृत्यामपो रपः। अपामार्ग त्वमस्मदपदुः ष्वप्न्यँसुव॥**

ततः परं स्नायात्। (पुनः एकपटक स्नान गर्ने)

## (ड) दूर्वाङ्कुरेण सेचनम्–

ॐकाण्डादित्यस्याग्निऋषिः दूर्वेष्टका देवताऽनुष्टुप्छन्दो दूर्वया मार्जने विनियोगः।

**(दाँया हातमा दूवो लिएर दिइएको मन्त्रले नाभि देखि शिर सम्म सेचन गर्ने)**

अथ दूर्वाकुरेण नाभेरूर्ध्वं वक्ष्यमाणमन्त्रेणात्मानं सिञ्चेत्।

**ॐ काण्डात्काण्डात्प्ररोहन्ती परुषः परुषस्परि। एवा नो दूर्वे प्रतनु सहस्रेण शतेन च॥**

ततो दूर्वाङ्कुरानपि विमुच्य स्नायात्। (दूवो लाई छोडिदिने र एकपटक स्नान गर्ने)

## (ढ) अथाघमर्षणं पापपुरुषनिरसनं वा

ॐऋतं चेत्यस्याघमर्षणऋषिर्भाववृतं दैवतमनुष्टुप् छन्दोऽघमर्षणे विनियोगः।

"अन्तर्जलेऽघमर्षणं त्रिरावर्तयेद् द्रुपदादिवायङ्गौरिति वा ऋचं प्राणायामं वा सशिरसमोमिति वा विष्णोर्वा स्मरणम्"।

(तल दिइएका तीन मन्त्रले तीन पटक अघमर्षण गर्ने)

**ॐ ऋतञ्च सत्यञ्चाभिद्धात्तपसोऽध्यजायत। ततो रात्र्यजायत ततः समुद्रोऽअर्णवः।**

**समुद्रादर्णवादधि संवत्सरोऽअजायत। अहोरात्राणि विदधद्विश्वस्य मिषतो वशी॥**

**सूर्याचन्द्रमसौ धाता यथा पूर्वमकल्पयत्। दिवञ्च पृथिवीञ्चान्तरिक्षमथो स्वः** । इति त्रिः।

**ॐ आयङ्गौः पृश्निरक्रमीदसदन्मातरम्पुरः। पितरञ्च प्रयन्त्स्वः** ॥ इति त्रिवारं वा।

**ॐ द्रुपदादिव मुमुचानः स्विन्नः स्नातो मलादिव। पूतम्पवित्रेणेवाज्यमापः शुन्धन्तु मैनसः** ॥ इति त्रिवारं वा॥

(तल दिएको मन्त्रले प्राणायाम गर्ने)

**ॐ भूः ॐ भुवः ॐ स्वः ॐ महः ॐ जनः ॐ तपः ॐ सत्यम् ॐ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि। धियो यो नः प्रचोदयात्॥ ॐ आपो ज्योति रसोऽमृतम्। ब्रह्म भूर्भुवः स्वरोम्॥** इति त्रिवारं वा॥

**(ण) ध्यानम्** (शान्ताकारं ....... यो मन्त्र तीन पटक भनेर विष्णु भगवान् को ध्यान गर्ने)

ॐ शान्ताकारं भुजगशयनं पद्मनाभं सुरेशं, विश्वाधारं गगनसदृशं मेघवर्णं शुभाङ्गम्।
लक्ष्मीकान्तं कमलनयनं योगिभिर्ध्यानगम्यं, वन्दे विष्णुं भवभयहरं सर्वलोकैकनाथम्॥

इति वा त्रिवारं मेघवर्णं शेषशायिनं लक्ष्म्या सेव्यमानं विष्णुं स्मरन् पठेत्। एवं स्नानं कृत्वा स्नानाङ्गतर्पणं कुर्यात्।

**(त) स्नानाङ्गतर्पणम्, तत्रादौ देवतर्पणम्– (स्नानाङ्ग तर्पण, प्रारम्भमा देवताको तर्पण)**
**(नोट– यो तर्पण सबैले गर्न हुन्छ।)**

तत्रादौ ऋजुकुशोपग्रहं सचन्दनाक्षततुलसीपत्रं जलमर्घ्यपात्रेण अञ्जलिना वा देवतीर्थेनैकैकवारं देवान् तर्पयेत्– (कुश, चन्दन, अक्षता, तुलसी पत्र र जल अञ्जलि वा अर्घ पात्रमा लिएर देवतीर्थ (अउलाको अग्रभाग) बाट तलको मन्त्र भन्दै जल एक एक पटक चढाउने)

**ॐ ब्रह्मादयो देवास्तृप्यन्ताम्।**
**ॐ भूर्देवास्तृप्यन्ताम्।**
**ॐ भुवर्देवास्तृप्यन्ताम्।**
**ॐ स्वर्देवास्तृप्यन्ताम्।**
**ॐ भूर्भुवः स्वर्देवास्तृप्यन्ताम्।**




अथ निवीती (कण्ठलम्बी) सन् कुशानुदग्रान् कृत्वाऽऽचम्य चोदङ्मुखो भूत्वा कायतीर्थेन प्रतिमन्त्रं सयवजलेन द्विर्द्विर्ऋषींस्तर्पयेत्।

**(थ) ऋषितर्पणम्–** (जनैलाई माला जसरी लगाएर आचमन गरेर, उत्तर मुख गर्ने र हातमा कुश आदि लिएर तलका मन्त्र भन्दै कान्छी औँला तिरबाट एक एक पटक ऋषिहरुलाई तर्पण गर्ने)

**ॐ सनकादिद्वैपायनान्ता ऋषयस्तृप्यन्ताम्।**
**ॐ भूर्ऋषयस्तृप्यन्ताम्।**
**ॐ भुवर्ऋषयस्तृप्यन्ताम्।**
**ॐ स्वर्ऋषयस्तृप्यन्ताम्।**
**ॐ भूर्भुवः स्वर्ऋषयस्तृप्यन्ताम्।**

ततः पितृतीर्थेन प्रतिमन्त्रं त्रिस्त्रिवारं दक्षिणामुखः प्राचीनावीती भूत्वा दक्षिणाग्रमूलान् कुशान् कृत्वा सतिलजलेन पितृन् तर्पयेत्।

(द) पितृतर्पणम्– (जनैलाई अपसव्य गरेर, दक्षिण मुख गर्ने र हातमा कुश आदि लिएर तलका मन्त्र भन्दै बुढे औँला तिरबाट एक एक पटक पितृहरुलाई तर्पण गर्ने)

**ॐ कव्यवाडनलादयः पितरस्तृप्यन्ताम्।**

**ॐ भूः पितरस्तृप्यन्ताम्।**
**ॐ भुवः पितरस्तृप्यन्ताम्।**
**ॐ स्वः पितरस्तृप्यन्ताम्।**
**ॐ भूर्भुवः स्वः पितरस्तृप्यन्ताम्।**
ततः सव्यः सन् आचामेत्।
(सव्य गरेर आचमन गर्ने)

अथ सतिलजलाञ्जलिमादाय–
(ध) तिलोदकोत्सर्जनम् (यक्ष्मतर्पणम्) (हातमा तिल र तीर्थजल लिएर तलको मन्त्र भनेर तीर्थको तटमा छोडिदिने)
**ॐ यन्मया दूषितं तोयं शारीरमलसम्भवैः।**
**तस्य पापस्य शुद्धयर्थं यक्ष्मैतत्ते तिलोदकम्॥** इति तीर्थतटे उत्सृजेत्।

(न) शिखोदकोत्सर्जनम् (वृक्ष अथवा तीर्थ समीप शुद्ध स्थानमा गएर त्यसको दाँया भागमा शिखालाई निचरिदिने)
**ॐ लतागुल्मेषु वृक्षेषु पितरो ये व्यवस्थिताः। ते सर्वे तृप्तिमायान्तु मयोत्सृष्टैः शिखोदकैः॥**
इति वृक्षादौ दक्षिणभागे शिखां निष्पीडयेत्।

**(प) सूर्योपस्थानम्**
सूर्यमुदीक्ष्य उपस्थानं कुर्यात्। (सूर्य तिर फर्केर हात माथि गरेर, तलको मन्त्र पढ्दै सूर्योपस्थान गर्ने)

ॐ अदृश्रमस्य केतवो विरश्मयो जनाँ२ऽअनु। भ्राजन्तो अग्नयो यथा।
उपयामगृहीतोसि सूर्यायत्वाब्भ्राजायैष ते योनिः सूर्याय त्वाब्भ्राजाय।
सूर्य भ्राजिष्ठ ब्भ्राजिष्ठस्त्वं देवेस्वसि भ्राजिष्ठोहम्मनुष्येषु भूयासम्॥

ॐ हꣳसः शुचिषद्वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत्।

नृषद्वरसदृतसद्व्योमसदब्जा गोजाऽऋतजाऽअद्रिजाद्ऋतं बृहत्॥

ॐ उद्वयन्तमसस्परि स्वः पश्यन्तऽउत्तरम्। देवन्देवत्रा सूर्यमगन्मज्योतिरुत्तमम्॥

ॐ उदुत्यन्जातवेदसन्देवं वहन्ति केतवः। दृशे विश्वाय सूर्य्यम्॥

ॐ चित्रन्देवानामुदगादनीकञ्चक्षुर्मित्रस्य वरुणस्याग्नेः।
आ प्प्रा द्यावापृथिवीऽअन्तरिक्षꣳसूर्य्यऽआत्मा जगतस्तस्थुषश्च॥

ॐ तच्चक्षुर्देवहितं पुरस्ताच्छुक्क्रमुच्चरत्।
पश्येम शरदः शतञ्जीवेम शरदः शतꣳश्रृणुयाम शरदः शतं प्रब्रवाम शरदः शतमदीनाः स्याम
शरदः शतम्भूयश्च शरदः शतात्॥

ॐ विभ्राड्बृहत् ... आकृष्णेनेत्यन्तं सप्तदशमन्त्रांश्च पठेत्।
नमः सवित्रे जगदेकचक्षुषे जगत्प्रसूतिस्थितिनाशहेतवे।
त्रयीमयाय त्रिगुणात्मधारिणे विरञ्चिनारायणशङ्करात्मने॥

इत्युपस्थाय नमस्कृत्य च धौते वाससी परिधाय भस्मादि धारणं कृत्वा गायत्रीं जपेत्।
ततो नारायणं स्मरन् गृहमाव्रजेत्।

(यसरी सूर्योपस्थान गरेर, सूर्यलाई नमस्कार गर्ने, शुद्ध धौत वस्त्र आदि धारण गर्ने, भस्मादि तिलका धारण गर्ने, गायत्री जप्ने र भगवान् नारायणलाई सम्भिन्दै घर वा मन्दिर जाने र नियममा रहने शुद्ध ब्राह्मण अभिमन्त्रण गरिएको जनै लगाउने)

## ॥ इति श्रावणीस्नानप्रयोगः ॥